श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री भैरोजीरङ्गनाथेन कृतम्

# ॥ श्री हनुमत्प्रसादस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमत्प्रसादस्तोत्रम् ॥

विलासो वैदेहीहृदयकमलोन्मीलनकला -
विदग्धो वाचां यः समभवदशोकावनितले।
प्रमाद्यल्लङ्केशस्मयविदलनोद्दाममहिमा
स दद्यादस्माकं सुरभिरिह वाचां मधुरताम्॥ 1 ॥

त्विषामीशं देवं वियति समुदञ्चत्स्वकिरणं
सुरद्रोर्मन्वानः फलमिति परीपाकमधुरम्।
ग्रहीतुं तं मातुर्बहिरवतरन्नेव जठरात्
समुद्युक्तो योऽभूत् स वितरतु धाटीं मम गिराम्॥ 2 ॥

तुरासाहि स्तोकं रचितवति यस्मिन्नविनयं
वितन्वन्तं स्तब्धं बधिरमवशं लोकमखिलम्।
समाधातुं क्लृप्तं कति कति समीरं स्तुतिगिरः
समन्ताद्वैधात्र्यो दिवि समुदिता नः स शरणम्॥ 3 ॥

तपस्तप्त्वा तीव्रं जगति शरदां यच्छतमहो
सुराणां सर्वेषां समभिलषितं चाप्यसुलभम्।
तदस्मिन् ब्रह्मास्त्रं समजनि यया कुण्ठितबलं
नमस्तस्यै शक्त्यै प्रणतजनगत्यै भवतु मे॥ 4 ॥

पुरस्तादुल्लोलोच्चलदलघुवीचीतरलितं
पयोधिं संवीक्ष्य द्रुतगलितधैर्ये कपिकुले।
जजृम्भे गम्भीरा तनुरधिमहेन्द्रक्षितिधरं
यदीया दिव्या सा भवतु मम भव्याय महते॥ 5 ॥

महावेगे तस्मिन् तरति जलधिं साह्यविधये
समायाताः केचिन्न परिगणिताः कार्यवशतः।
विनश्यद्विश्वासे मरणशरणे दुर्गतजने
सुखं वा दुःखं वा किमु कलयते कार्यपरता ॥ **6** ॥

गभीरप्रोन्मीलन्नतवलितनाभीविलसितं
मदोद्यल्लोलम्बद्युतिरुचिररोमावलियुतम्।
समुन्मीलत्सान्द्रत्रिवलिजितगङ्गाम्बुललितं
नताङ्गीबृन्दं को भवति विमुखो वीक्ष्य यदृते ॥ **7** ॥

स्फुटन्मल्लीमालाकलितकबरीभाररुचिराः
समञ्चद्वक्षोजद्वयविहतकोकीमदभराः।
समृध्यत्तारुण्या निशि विवसना वीक्ष्य युवतीः
विना तं धीराग्र्यं जगति गणयेत् तुच्छमिह कः ॥ **8** ॥

त्रिलोकीकल्याणी त्रिषवणपराणामभिमता
त्रयीवेद्या स्तुत्या त्रिदशपतिसंत्राणनिपुणा।
दिदीपे शाखेव क्षितिनिपतिता प्रोन्नततरोः
अशोकोद्याने यन्नयनसुभगा दीप्तिकलिका ॥ **9** ॥

दयासारद्रोणी दरदलितपङ्केरुहरुचिः
शरज्ज्योत्स्नाधारा शमधनजनानन्दजननी।
अशोकोद्यानेऽर्चिः कलितकरुणी कापि रुरुचे
यदग्रे कल्याणी कलयतु स नः कामितमिह ॥ **10** ॥

विलुप्ते विश्वासे विगतवति धैर्ये द्रुमतले
निरूपाभिर्हंहो विनयरहिताभिः परिवृतौ।
निदेशे यो भावः समजनि रहो भूषणवरे
चिराद् दृष्टे देव्या तमनुगदितुं को नु चतुरः ॥ **11** ॥

पटीयान् पाथोधेः सलिलमखिलं शोषकलिलं
विधातुं लङ्कां या भसितकलुषां मारुतसखः।
यदीयं वालाग्रं स्वयमधिगतो नादहदहो
स मे देवो हार्दं व्यपनयतु गाढान्धतमसम्॥ **12** ॥

समुत्साहं ब्रूमः कथमिव कपीनां यदुदिते
समुत्कण्ठा सर्वंकषपटुनि गम्भीरवचसि।
अहो दृष्टा सीतेत्यमृतरसनिष्यन्दमधुरे
निषीदद्बालानामिव स जयतान्मातृवचने॥ **13** ॥

यदानीते सान्द्रस्फुरदनुपमानन्दलहरी
यथा धेनोर्वत्सेऽस्रवदिव जगन्मूर्तिहृदये।
स देवीमूर्धालङ्करणमहिते दृष्टिविषये
मणौ स्यान्मे भूत्यै प्रणतजनचिन्तामणिवरे॥ **14** ॥

जयतु जयतु रम्यं ब्रह्मचर्यस्य भाग्यं
जयतु जयतु देव्या अञ्जनायाश्च भाग्यम्।
जयतु च रघुवीरे भक्तिमद्भागधेयं
जयतु विशरणानां पक्त्रिमं भागधेयम्॥ **15** ॥

भैरोजीरङ्गनाथेन कृतं स्तोत्रं हनूमतः।
भूयाद् भूत्यै रसविदां भक्तिभाजां हनूमति॥ **16** ॥

॥ इति श्री हनुमत्प्रसादस्तोत्रं समाप्तम्॥